Ex/CBCS/SAN/UG/CORE/5.1/2025

# BACHELOR OF ARTS EXAMINATION, 2025

**( 3rd Year, 5th Semester )**

**SANSKRIT (HONOURS)**

**COURSE : XI**

**[ Vedic Texts and Vedic Grammar ]**

*Time* : *Two Hours* — *Full Marks* : 30

*The figures in the margin indicate full marks.*

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्।

**1.** अधस्तनयोः प्रश्नयोः **एकस्य** उत्तरं प्रदेयम् — 6×1=6

(क) भवदधीतम् ऋग्वेदगतं मन्त्रभागमाश्रित्य अग्निदेवतायाः स्वरूपं सम्यक् उपपाद्यताम्।

(ख) ऋग्वेदस्य दशममण्डलान्तर्गतस्य देवीसूक्तस्य दार्शनिकतात्पर्यं समुपस्थाप्यताम्।

**2.** अधोलिखितः मन्त्रः ऋषिच्छन्दोदेवतानिर्देशपुरःसरं सायणभाष्यानुसारेण व्याख्यायताम् — 4

अ॒ग्निर्होता॑ क॒विक्र॑तुः
स॒त्यश्चि॒त्रश्र॑वस्तमः।
दे॒वो दे॒वेभि॒रा ग॑मत्॥

**3.** अधोनिर्दिष्टयोः विनियोगवाक्ययोः **एकस्य** व्याख्या करणीया — 4×1=4

(क) तस्मिन् सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः।

(ख) आदितस्तिस्र ऋचः सौर्यस्य पशोर्वपापुरोडाशहविषां क्रमेणानुवाक्या।

**4.** निम्नोद्धृतेषु पदेषु **एकस्य** सूत्रनिर्देशपुरःसरं स्वरसञ्चरणं करणीयम् — 2×1=2

अग्निम् । यज्ञस्य । हिरण्यगर्भः।

**5.** अधःस्थितानां पदानां **एकस्य** ससूत्रं पदसाधनं करणीयम् — 2×1=2

पुरोहितम् । अश्नवत् । अक्षासः।

**6.** अधोलिखितानां वैदिकपदानां **द्वयोः** लौकिकसंस्कृतरूपं प्रदेयम् — 1×2=2

देवेभिः । दृष्ट्वाय । दाधार।

**7.** अधस्तनयोः **एकस्य** वैदिकव्याकरणविषयको विचारः प्रस्तूयताम् — 6×1=6

(क) वैदिक-लेट्-लकारस्य वैशिष्ट्यानि।

(ख) वैदिक-तुमर्थक-कृदन्त-पदानि।





**8.** निम्नलिखितस्य ऋग्वेदीयमन्त्रस्य पदपाठः प्रदर्शनीयः — 4

स न॑ः पि॒तेव॑ सू॒नवे-
ऽग्ने॑ सूपाय॒नो भ॑व।
सच॑स्वा नः स्व॒स्तये॑।।

★★★